मूहाम्।तथा “उत्पादना क्रियाऽपि व्यापारः ‘व्यापारो-भावना सैवोत्पादना सैवच क्रिया” हरिः।

**अव्यापिन्** त्रि० न व्याप्नोति वि—आप णिनि न०त० स्त्रियां ङीप्।१अव्यापके २परिच्छिन्ने च “हेतुमदनित्यमव्यापि सक्रियमाश्रितं लिङ्गम्” सां०सू०सा०का०च। “अव्यापित्वं परिच्छिन्नत्वम्” सां०प्र०भा०।

**अव्याप्त** त्रि०न व्याप्तः।१व्याप्तभिन्ने इयत्तया२परिच्छिन्ने च।

**अव्याप्ति** स्त्री अभावे न०त०।१व्याप्तेरभावे।व्याप्तिश्च तदभाववदवृत्तित्वम् व्यापकसामानाधिकरण्यमनौपाधिकत्वं आधेयतादिवत् वस्तुस्वभावविशेषोवा मतभेदेन ज्ञेया। २लक्ष्ये लक्षणस्याप्रवृत्तौ च “अव्याप्यवृत्तिसाध्यकसद्धेतावव्याप्तिमाशङ्क्याह” दीधितिः।

**अव्याप्य** त्रि० व्याप्तिविशिष्टोव्याप्यः न०त०। व्याप्तिविशिष्टभिन्ने १व्याप्तिशून्ये यथा वह्निर्धूमस्य अव्याप्यः वह्न्यधिकरणे तप्तायःपिण्डे धूमस्यावृत्तेः तथात्वम्।वि+आप-ल्यप् न०त०। २सर्व्वावच्छेदमप्राप्येत्यर्थे अव्य०।

**अव्याप्यवृत्ति** त्रि० अव्याप्य सर्व्वावच्छेदमप्राप्य वृत्तिर्यस्य। स्वाधिकरणे अंशविशेषे कालभेदे वा अस्थिते पदार्थे यथा संयोगादिर्घटादिस्य न सर्व्वदेशं व्याप्य स्वाधिकरणे गृहादौ तिष्ठति। तथा आत्मनि ज्ञानादिकं न सर्व्वदा तिष्ठति। अतः संयोगादीनां स्वाधिकरण एव अंशभेदे कालभेदे च असत्त्वात्तथात्वम्। अव्याप्यवृत्तिनियामकस्य देशः कालस्य तत्र देशे सत्त्वे क्वचित् कालस्य देशभेदस्य वा नियामकत्वं क्वचित् कालसत्त्वे देशस्य इति अव्याप्यवृत्तयस्य संयोगविभागादयो दैशिकाः कालिकाश्च तथा आत्मनि बुद्धिसुखदुःखेच्छाद्वेषयत्नधर्म्माधर्म्मभावनाख्यसंस्काराः तेषां देहावच्छेदेन सत्त्वेऽपि घटाद्यवच्छेदेनासत्त्वात् देहावच्छेदेऽपि सर्व्वदाऽसत्त्वाच्च तथात्वम् एवं शब्दस्य दैशिककालिकाव्याप्यवृत्तित्वम् गन्धादयस्तु कालिकाव्याप्यवृत्तयस्ते हि स्वाधिकरणे एव उत्पत्तिकाले प्रलये च परमाणौ न तिष्ठन्ति। संयोगेन घटादयोऽपि दैशिककालिकाव्याप्यवृत्तयः। “अव्याप्यवृत्तिः क्षणिको विशेषगुण इष्यते” भाषा० “अव्याप्यवृत्तिसाध्यकसद्धेताविति” दीधितिः।

**अव्यायाम** पु० अभावे न०त०। १व्यायामाभावे परिश्रमसाधनव्यापाराभावे २विशेषेण विस्ताराभावे च न०ब०। ३तच्छून्ये त्रि०।

**अव्यावर्त्तक** त्रि० न व्यावर्त्तयति इतरेभ्यो निवारयति वि+आ+वृत—णिच्—ण्वुल् न०त०। १रक्षादक्षतनिवारणे २इतरस्माद्भेदासाधके ३अविशेषके च।

**अव्यावर्त्तन** न० वि+आ-वृत—णिच्—ल्युट् अभावे न०त०। इतरस्मादनिवारणे न०ब०। व्यावृत्तिशून्ये त्रि०।

**अव्याहत** त्रि० विशेषेणाहतः प्रतिरुद्धः न०त०। व्याघातशून्ये व्याघातश्च विरोधप्रतिसन्धानेनाप्रसङ्गः २अप्रतिरुद्धे च। “अव्याहताज्ञः सर्व्वत्र” पुरा० व्याहतं मिथ्यार्थकं तद्भिन्ने ३सत्ये वाक्ये न०।

**अव्याहतत्व** न० अव्याहतस्य भावः त्व। १व्याघाताभावे हेमचन्द्रोक्ते २वाक्यगुणभेदे च ते च गुणाः यथा “संस्कारवत्त्वमौदार्य्यमुपचारपरीतता। मेघनिर्घोषगाम्भीर्य्यं प्रतिनादविधायिता॥ दक्षिणत्वमुपनीतरागत्वं च महार्थता।अव्याहतत्वं स्लिष्टत्वं संशयानामसम्भवः॥ निराकृतान्योत्तरत्वं हृदयङ्गमिताऽपि च। मिथःसाकाङ्क्षताप्रस्तावौचित्यं तत्त्वनिष्ठता॥ अप्रकीर्ण प्रसृतत्वमसंस्लाघ्यान्यनिन्दिता। आभिजात्यमतिस्निग्धमधुरत्वं प्रशस्तता॥ अमर्म्मवेधितौदार्य्यं धर्म्मार्थप्रतिबद्धता। कारकाद्यविपर्य्यासोविभ्रमादिवियुक्तता॥ चित्रकृत्त्वमद्भुतत्वं तथानतिविलम्बिता। अनेकजातिवैचित्र्यमारोपितविशेषता॥ सत्त्वप्रधानता वर्णपदवाक्प्रविविक्तता। अव्युच्छित्तिरखेदित्वमञ्चत्रिंशच्च वा गुणाः”॥

**अव्युत्पन्न** त्रि० वि+उद्+पद—क्त न०त०। समुदायशब्दस्यावयवशोऽर्थबोधकताशक्तिः व्युत्पत्तिः तच्छून्ये अवयवार्थशून्ये शब्दे, “उणादयोव्युत्पन्नाः प्रातिपदिकम्” पा०। २शब्दावयवार्थानभिज्ञे अवैयाकरणे च।

**अव्युत्थिति** स्त्री वि+उद्+स्था—क्तिन् अभावे न०त०। उत्थानाभावे २वाक्यगुणभेदे च अव्याहतत्वशब्दे विवृतिः।

**अव्रण** त्रि० नास्ति व्रणोऽस्य। १व्रणशून्ये व्रणश्च क्षतादि “तत्रादौ दन्तपवनं द्वादशाङ्गुलमायतम्। कनिष्ठिकापरीणाहमृज्वग्रायतमव्रणम्” सुश्रु०। २नेत्ररोगभेदे “यत् सव्रणं शुक्रमथाव्रणं वा पाकात्ययश्चाप्यजका तथैव। चत्वार एतेऽभिहिता विकाराः कृष्णाश्रयाः संग्रहतः पुरस्तात्” इति विभज्य, तल्लक्षमाप्युक्तं सुश्रुते “सितं यदा भात्यसितप्रदेशे स्यन्दात्मकं नातिरुगश्रुयुक्तम्। विहायसीवाभ्रदलानुकारि तदव्रणं साध्यतमं वदन्ति” “अनेनापहरेच्छुक्रमव्रणं कुशलोभिषक्” सुश्रु०।

**अव्रत** त्रि० नास्ति व्रतं विहितनियमो यस्य। शास्त्रविहितनियमशून्ये “अव्रतानाममन्त्राणां जातिमात्रोपजी-